International Journal of Sanskrit Research 2021; 7(6): 136-141

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(6): 136-141
© 2021 IJSR
www.anantaajournal.com
Received: 07-09-2021
Accepted: 09-10-2021

**ज्वलन्त कुमारः**
शोधच्छात्रः, संस्कृतविभागः
दिल्लीविश्वविद्यालयः, दिल्ली, भारत

**Corresponding Author:**
**ज्वलन्त कुमारः**
शोधच्छात्रः, संस्कृतविभागः
दिल्लीविश्वविद्यालयः, दिल्ली, भारत

# आभीयो बलाबलत्वविमर्शः

## ज्वलन्त कुमारः

**प्रस्तावना**

भाषायाः संरनात्मक-विश्लेषणं कर्तुं शास्त्रकारः येषां व्याकरणनियमानां निर्धारणं कुरुते, तेषां मध्ये यदि कश्चन अन्तर्विरोधः उत्पद्यते, तस्य प्रकारद्वयं भवति-

१. भिन्न-भिन्नप्रवृत्तसूत्राणाम् एकस्मिन्नेव लक्ष्ये (शब्दे) प्राप्तिः।

२. एकस्य नियमस्य (सूत्रस्य) प्रवृत्त्यनन्तरं (उत्तरकाले) एव अन्यस्य अपरस्य सूत्रस्य अनभीष्टा प्रवृत्तिः। तदेतेषामुक्तप्रकाराणाम् अन्तर्विरोधानां परिहाराय शास्त्रकारः तान्-तान् विधीन् प्रविधीन् वा स्वीकरोति येषां माध्यमेन अभीष्टसूत्राणां प्रवृत्तिः, अनभीष्टसूत्राणां च निवृत्तिः स्यात्।

तदत्र आचार्यपाणिनिना अष्टकस्य सूत्रेषु यत्र-तत्रोत्पन्नानामन्तर्विरोधानां परिहाराय मार्गद्वयं प्रदर्शितम् -

**१. सहप्रसक्तानां सूत्राणां मध्ये बाध्य-बाधकभावः स्वीकृतः।**

कस्य सूत्रस्य प्रवृत्तिः कार्या, अथवा निवृत्तिः एतत् सुस्पष्टमेव क्रियते अथवा सामान्यतर्काधीनम्। एतमेव पारिभाषिकशब्दावल्यां तुल्यबलविरोधः इति कथ्यते।

**२. पूर्वपरनित्यान्तरङ्गापवादानाम् उत्तरोत्तरं बलीयः।**

इति बलीयस्त्वम् आधारीकृत्यलक्ष्येषु अनभीष्टप्राप्तानां सूत्राणां निवृत्त्यर्थम् अवरोधाय वा आचार्येण असिद्धनामकेयं प्रविधिः विरचितः।

आचार्यहरदत्तमिश्रानुसारं सिद्धशब्दो निष्पन्नतायाः द्योतकोऽस्ति। यन्निष्पन्नमपि अनिष्पन्नमिव भासते तदसिद्धम्।

**१. सिद्धशब्दो निष्पन्नवचनः, न सिद्धोऽसिद्धः, यः पुनः सिद्धोऽपि सिद्धकार्यं न करोति, स तेन तुल्यं वर्त्तते इति असिद्धवत् [1]।**

उदाहरणार्थं 'जहि' इत्ययं शब्दः प्रस्तूयते - 'हन्' धातोः लोट् लकारस्य मध्यमपुरुषस्य एकवचनस्येदं रूपम्। हन्+सिप् 'सेर्ह्यपिच्च' [2] इति सूत्रेण सिपः स्थाने हि आदेशः। हन् इत्येतस्य च स्थाने 'हन्तेर्जः' [3] इति सूत्रेण जकारादेशः। ज+हि इति स्थितौ 'अतो हेः' [4] इति सूत्रेण अकारान्तादङ्गादुत्तरस्य हि इत्येतस्य लोपो भवति। परन्तु जकारादेशस्य असिद्धत्वात् 'अतो हेः' इति सूत्रं न प्रवर्त्तते, इष्टरूपश्च सिध्यति। आधुनिके भाषाविज्ञानेऽपि असिद्धत्वसिद्धान्तस्य प्रतिपादनं स्वीकृतं वर्त्तते।

अष्टाध्याय्यां बलाबलत्वनिर्णये असिद्धशब्दस्य प्रयोगः त्रिषु स्थलेषु दृष्टिगोचरो भवति -

**(क ) 'षत्वतुकोरसिद्धः'**

षत्वे तुकि च कर्त्तव्ये एकादेशोऽसिद्धो भवति। उदाहरणार्थः - कोऽसिञ्चत् इत्यत्र 'षिच् क्षरणे' धातो आद्यषकारं सकारादेशः 'धात्वादे षः सः' [5] लङ् लकारः, धातोः अटागमः, तिप्प्रत्ययः शव्विकरणम्, नुमागमः, अनुस्वारः परसवर्णश्च भूत्वा असिञ्चत् इति रूपं सिध्यति। अधुना को+असिञ्चत् इत्यत्र इण् इति ओ इत्येतस्मात् उत्तरस्य षकारादेशः प्राप्नोति 'आदेशप्रत्यययोः' इति सूत्रेण, यच्च शब्दकाराणां नाभीष्टं वर्त्तते। तच्च षत्वतुकोरसिद्धः इति सूत्रेण सिध्यति।

**(ख) 'असिद्धवदत्राभात्'** [6]

अङ्गाधिकारस्य अन्तर्गतम् असावासिद्धाधिकारः पठितोऽस्ति। अस्मिन् क्रमदृष्ट्या पूर्वं प्रति परम् असिद्धं न भवति यथा पूर्वत्रासिद्धम् इत्येतस्मिन् सूत्रे भवति। अपितु अत्र लक्ष्ये पूर्वं प्रवृत्तम् आभीयसूत्रम् अपर-आभीयसूत्रस्य कर्त्तव्यतायाम् असिद्धं भवति, तत्सूत्रं पूर्वं भवतु अथवा परम्। आभीय-असिद्धत्वस्य विस्तृतं विवेचनम् अग्रिमेषु स्थलेषु करिष्यते। अत्र तु केवलं सामान्यरूपेण दिग्दर्शनमात्रमेव प्रस्तूयते।

**(ग) 'पूर्वत्रासिद्धम्'**

असावपि अधिकारः। 'अदः' सूत्रं हि अष्टाध्याय्याः विभाजनं प्रति संकेतयति। अस्मात् सूत्रात् प्राक् यत् सपाद-सप्ताध्याय्याः उपदेशः कृतोऽस्ति। तं प्रति असौ त्रिपादीशास्त्रम् असिद्धं भवति। अस्यैव सूत्रस्य अपरोऽयमपि अर्थः - यत् अस्यां त्रिपाद्यमपि पूर्वं पूर्वं प्रति परं शास्त्रम् असिद्धं भवति। उदाहरणार्थम् - अस्मा उद्धर।

अस्मिन् वाक्ये 'अस्मै उद्धर' अस्याम् अवस्थायाम् 'एचोऽयवायावः' इति सूत्रेण ऐ स्थाने आयादेशः। अधुना अस्माय्+उद्धर अस्यां हि स्थितौ 'लोपः शाकल्यस्य' इति सूत्रेण यकारस्य लोपो प्रसज्यते, तदनन्तरम् अस्मा+उद्धर इति स्थितौ गुणः प्राप्नोति 'आद्गुणः' इति सूत्रेण।

अधुना 'पूर्वत्रासिद्धम्' इति सूत्रेण 'आद्गुणः' सूत्रं 'लोपः शाकल्यस्य' इति सूत्रं प्रति असिद्धं भवति येन हि यकारः दृश्यते, प्राप्ते च यकारे गुणादेशो न प्रवर्त्तते। येन इष्टान्वाख्यानम् अभीष्टसिद्धिश्च भवति।

इत्थम् अष्टाध्याय्यां त्रिषु स्थलेषु असिद्धशब्दस्य प्रयोगो विहितः आचार्यपाणिनिना। यस्य स्व-स्व-स्थाने महत्त्वपूर्णः स्वीयः अकल्पनीयः शास्त्रसम्मतः महिमा अस्ति। तदत्र आभीये प्रकरणे असिद्धस्य का उपादेयता कश्चेष्टसिद्धिः इति अग्रे यथायोगं वर्णयिष्यते।

**असिद्धप्रकाराः** उपर्युक्तेन विवेचनेनैतत् स्पष्टीयते, यत् प्रवृत्त्यां सत्यामपि अप्रवृत्तवत् तिष्ठति तदसिद्धम् इति। साम्प्रतं चासौ प्रश्नः मनसि समुत्पद्यते यत् असिद्धः कथं शास्त्रे प्रवर्त्तते, कतिप्रकारकं च भवति। तदुच्यते –

**आदेशलक्षणनिषेधार्थम्, उत्सर्गलक्षणभावार्थं च** [7] ।।

१. **आदेशलक्षणनिषेधः** आदेशं निमित्तं मत्वा प्रवृत्तोत्तरकालिकविधीनां निषेधः = आदेशलक्षणनिषेधः। आदेशो लक्षणं निमित्तं यस्य तदादेशलक्षणम्। तस्य प्रतिषेधः। सोऽर्थः प्रयोजनं यस्य तत् तथोक्तम् [8]। यस्मिन् पदे कोऽपि आदेशो भवति, अनन्तरम तमेव आदेशं निमित्तं मत्वा किमपि अन्यत् कार्यं प्रवर्त्तते, तस्यामवस्थायां तदादेशभूतं पदं (कार्यं) वा असिद्धं भवति। येन हि कोऽपि अनिष्टविधिः न प्रवर्त्तते। आदेशलक्षणनिषेधम् उदाहरणरूपेण अवगमनाय 'जहि' इति पदस्योपन्यासः क्रियते।

'हन्' धातोः लोट् लकारस्य मध्यमपुरुषस्य एकवचने 'जहि' शब्दो निष्पद्यते। हन्+सिप्, 'सिपः' स्थाने 'हि', 'हन्'धातोः जकारादेशः। ज+हि अधुना 'अतो लोपः' सूत्रेण हेः लोपः प्राप्नोति, परन्तु जकारादेशस्य असिद्धत्वात् पूर्वावस्थायाः हन् एव उपलभ्यते, यश्च अकारान्तो नास्ति, अतः 'अतो लोपः' इति सूत्रं न प्रवर्त्तते, जहि इत्येतत् च अभीष्टं रूपं सिध्यति।

१. **'सेर्ह्यपिच्च'** २. **'हन्तेर्जः'**।

**(ख) उत्सर्गलक्षणभावार्थः च-**

उत्सृज्यते निर्वर्त्यते इति उत्सर्गः स्थानिलक्षणम्। उत्सर्गो लक्षणं निमित्तं यस्य तदुत्सर्गलक्षणम् कार्यम्। तस्य भावः उपजननमुत्सर्गलक्षणभावः [9]।

स्थानीं निमित्तं मत्वा भावितानां विधीनां प्रवृत्तिः येन कार्यते तद् असिद्धत्वस्य द्वितीयलक्षणम्। यदि कश्चन आदेशः कृतः, परन्तु आदेशस्य यः स्थानी तं निमित्तं कृत्वा किञ्चित् कार्यं प्रवर्त्तते तर्हि सः आदेशः असिद्धः भवति, स्थानिनञ्च निमित्तीकृत्य कार्यं प्रवर्त्तते, अयमेव 'उत्सर्गलक्षणभाव' इत्युच्यते।

उदाहरणार्थम् उपादीयते 'शाधि' इत्ययं प्रयोगः। शाधि इत्यत्र हि 'शासु अनुशिष्टौ' इति धातोः लोट् लकारस्य मध्यमपुरुषस्य प्रथमवचनस्येदं रूपम्। शास्+सिप् इति स्थितौ सिपः स्थाने हि आदेशः 'सेर्ह्यपिच्च' इति सूत्रेण। 'शा हौ' इति सूत्रेण 'शा' आदेशः। अधुना अत्र शाधि इति प्रयोगनिर्माणाय हि स्थाने धि इत्ययमादेशः 'हुझल्भ्यो हेर्धिः' झलन्तात् धातोः उत्तरस्य हि स्थाने धि आदेशः परन्तु 'शा हौ' इत्यनेन विहितः शा आदेशो झलन्तो नास्ति। तदत्र असिद्धवदत्राभात् इति सूत्रं प्रवर्त्तते। येन हि उत्सर्गलक्षणभावनियमात् शास् इत्ययं निमित्तं मत्वा हि स्थाने धि इत्ययमादेशो भविष्यति 'हुझल्भ्यो हेर्धिः' इति

सूत्रेण। इत्थमेव 'अस्' धातो लोट् लकारस्य एधि इति रूपस्य विषये विज्ञेयम्।

**शास्त्रासिद्धम् अथवा कार्यासिद्धम् -**

अष्टाध्याय्यां हि त्रिषु स्थलेषु असिद्धत्वयोजनायाः उपयोगः कृतोऽस्ति। असिद्धत्वस्य प्रत्येकं स्थाने एकवदेव व्यापारः भवति। पाणिनीये व्याकरणे अयं प्रश्नः प्रायशः समुपतिष्ठते यदसिद्धं शास्त्रं भवति अथवा कार्यम्। कैयटः हरदत्तमिश्रश्च विस्तरेणैतत् विवेचितवान्। 'प्रधानाप्रधानयोः प्रधाने कार्यसम्प्रत्ययः' [10] यद्यसौ न्यायः स्वीक्रियते चेत् कार्यस्यैव प्रधानत्वात् कार्यमेवासिद्धं स्यात्। शास्त्रन्तु भवति प्रसज्यते प्रवर्त्तते कार्याय। अतः शास्त्रमप्रधानं कार्यञ्च प्रधानम्।

कार्यं यदि असिद्धत्वेन स्वीक्रियते चेत् निम्नार्थस्य प्रतीतिः भवति - अधिकारपर्यन्तं प्रवृत्तं कार्यमप्यप्रवृत्तवदेव भवति।

**आभाच्छास्त्रीयं कार्यम प्रवृत्तमपि प्रवृत्तकार्यं न करोतीति अतः प्रवृत्तकार्यं निबन्धनस्यैव कार्यस्य प्रतिषेधः स्यात् [11]।**

इत्थं हि स्वीकृते सति 'जहि' आदिषु प्रयोगेषु आदेशलक्षणप्रतिषेधस्तु प्रवर्त्तते यतोहि अत्र 'हन्' धातोः स्थाने आदेशभूतं जकारं निमित्तं मत्वा भाविनः कार्यस्य निषेधो जायते परन्तु स्थानीभावलक्षणस्य कार्यं न सम्पद्यते। स्थानीभावलक्षणस्य उदाहरणे एधि इत्यत्र स्थानी सकारस्य आदेशभूतम् एत्वं (ध्वसोरेद्धावभ्यासलोपश्च) निमित्तं मत्वा न किञ्चित् कार्यं प्राप्यते यस्य प्रतिषेधः स्यात्। अतः 'अस्' धातोः स्थानीभूतस्य अभावे स्थानीनिमित्तकं धिभावस्य प्राप्तिरेव न भविष्यति। अस्याः समस्यायाः समाधानम् एतद्यत् अप्रधानसत्यपि शास्त्रमसिद्धं स्यात्। यदि शास्त्रम् असिद्धम् इत्येतत् स्वीक्रियते तर्हि असौ अर्थः प्राप्यते - भाधिकारपर्यन्तं शास्त्रं निष्पन्नमपि स्वीकार्यं न करोति अर्थात् अप्रवृत्तवदेव तिष्ठति।

**आभीयं शास्त्रं निष्पन्नमपि स्वीकार्यं न करोति [12]।**

नागेशभट्टः शास्त्रासिद्धत्वं देवदत्त-हन्तृहतन्यायेन स्पष्टं कुरुते। तेषामभिप्रायोऽयं यत् यदि केनापि मनुष्येण देवदत्तः मारितः, तदा यदि केनापि मनुष्येण स मनुष्योऽपि मार्यते तदापि देवदत्तः न जीवितो भवति। एतन्न्यायानुसारम् एधि इत्यत्र सकारस्य हन्ता 'ए' इत्येतस्यासिद्धे सत्यपि सकारः न आगमिष्यति यतोहि तस्य तु विनाशः सुतरामभवदेव। इत्थं सकारस्याभावे झलन्तकार्यं 'हुझल्भ्यो हेर्धिः' इति न भवितुमर्हति। अतः शास्त्रासिद्धस्यापि मतमुचितमेव।

हरदत्तमिश्रस्य मतमेवं यत् शास्त्रस्य व्यापकप्रभावानुसारं तस्यैवासिद्धत्वं स्वीकार्यं यतोहि आभात् इति पदेन शास्त्रशब्दस्य एव निर्देशः कृतोऽस्ति। आचार्यकैयटोऽपि शास्त्रासिद्धत्वमेव स्वीकरोति। यतोहि कार्यासिद्धत्वस्यापेक्षया शास्त्रासिद्धत्वस्य प्रभावः अधिकं व्यापकमस्ति। कार्यमपि शास्त्रे एव अन्तर्हितः भवति। अतः शास्त्रासिद्धत्वस्य एव अवधारणा इष्टसिद्धये उपयुक्तास्ति।

**असिद्धत्वस्य अधिकारनिर्णयः**

आभीयासिद्धत्वस्याधिकारस्य अवधिविषये विशिष्टा मीमांसा अपेक्षिता। सूत्रकारः 'असिद्धवदत्राभात्' इत्येतस्मिन् सूत्रे आभात् पदस्य ग्रहणं कुरुते। तदत्र संशय उत्पद्यते यत् - अत्र 'आङ्' मर्यादार्थेऽस्ति अथवा अभिविधौ। आङ् इत्यस्य ग्रहणं यदा मर्यादा अर्थे भवति तदा अर्थः भवति- निर्दिष्टं विहाय अर्थात् 'भ' संज्ञां विहाय, अभिविधौ यदा अर्थः क्रियते- निर्दिष्टं सम्मेल्य अर्थात् भाधिकारपर्यन्तमिति भावः।

**आभात् इत्यस्य मर्यादार्थे विवेचनम्।**

आभात् इति पदे भात् इत्यनेन तात्पर्यं 'भस्य' [13] इति सूत्रेणास्ति। आभात् इति पदस्य मर्यादार्थकत्वविषये भाष्यकारः विस्तृतं चर्चितवान् सर्वप्रथमं भाधिकारात् पूर्वं यदि अधिकारः स्वीक्रियते तर्हि तत्रोत्पन्नानां दोषाणां परीक्षणमावश्यकम्।

यदि वयमसिद्धवदाधिकारं भाधिकारात् पूर्वपर्यन्तं स्वीकुर्मः, तदा शुना, मघोना, एवं भूयान् शब्दानामिष्टान्वाख्यानाय पृथक् असिद्धत्वस्य उपसंख्यानम् करणीयं भविष्यति। शुना इति शब्दसिद्धौ श्वन्+टा अस्यां स्थितौ 'श्वयुवमघोनामतद्धिते' [14] इति सूत्रेण अतद्धित प्रत्यये परतः सम्प्रसारणं भवति। व् स्थाने उकारः। श् उ अ न् इयं स्थितिः उत्पद्यते पुनः 'सम्प्रसारणाच्च' इति सूत्रेण भाविनं सम्प्रसारणं 'अल्लोपोऽनः' [15] इति सूत्रेण बाध्यते तथा अकारस्य लोपः प्राप्नोति। प्रदीपकारकैयटोऽत्र 'वार्णादाङ्गं बलीयः' [16] इति परिभाषाम् उद्धरति। किन्तु यद्यत्र अकारलोपः प्रसज्यते तर्हि अनिष्टसिद्धिः भवति। अत्र अकारलोपनिवारणाय अलोपविधायकं सूत्रं प्रति सम्प्रसारणम् असिद्धवद्भवतीति वक्तव्यम्। येन हि सम्प्रसारणम् असिद्धं भूत्वा 'श्वन्' इति रूपम् उपलप्स्यते, परन्तु मर्यादार्थे यदि आङ् स्वीक्रियते तदैतन्न सम्भवम्, यतोहि 'अल्लोपोऽनः' सूत्रस्य क्रमसंख्या ६.४.१३४ इति वर्त्तते।

तथैव 'मघोना' शब्दस्य सिद्धौ मघवन्+टा इति स्थितौ 'श्वयुवमघोनामतद्धिते' सूत्रेण सम्प्रसारणं कृते सति मघ उ अन् इति स्थितौ मघम् अस्यास्तीति विग्रहे कृते सति मघ शब्दात् वनिप् प्रत्ययो भूत्वा 'छन्दसि वनिपौ वक्तव्यौ' मघवन् शब्दः सिध्यति। मतुप् प्रत्ययः तद्धितसंज्ञकः अतः सम्प्रसारणे कृते मघ उन्+अस् इयं प्रकृतिः सम्भाव्यते। अत्र अवर्णान्तस्य मघशब्दस्य अजादितद्धितप्रत्यये परतः 'भ'संज्ञां विधाय 'यस्येति च' [17] सूत्रेण अकारस्य लोपः प्राप्नोति, यच्च अनभीष्टं रूपं साधयति। अत्र अकार लोपो न प्रसज्येत अतः 'श्वयुवमघोना०' (६.४.१३३) इति सूत्रेण यत् सम्प्रसारणमभवत् तदाभीयाकारलोपविधायकसूत्रं प्रति 'यस्येति च' असिद्धं मन्तव्यं भविष्यति सम्प्रसारणं तदैव

असिद्धं भविष्यति यदा-यदा मर्यादापक्षं विहाय अभिविधिः पक्षः स्वीक्रियते, यतोहि यस्येति सूत्रस्य क्रमसंख्या अस्ति (६.४.१४८) इति। मर्यादा पक्षस्य दोषोद्भावनायां तृतीये उदाहरणे भाष्यकारः 'भूयान्' इति पदमुपस्थापयति। भूयान् शब्दे बहु+ईयसुन् 'द्विवचनविभज्योपपदे तरबीयसुनौ' [18] तदनन्तरम् ईयसुन् प्रत्यये परतः 'बहोर्लोपो भू च बहोः' [19] इति सूत्रेण बहु शब्दस्य स्थाने भू आदेशः तथा ईयसुन् प्रत्ययस्य आदिवर्णस्य लोपः भवति। भू+यस् अस्यां हि स्थितौ 'ओर्गुणः' [20] इति आभीयसूत्रेण 'भू' इत्यस्याङ्गस्य गुणः प्राप्नोति, परन्तु गुणस्य कार्यमिहानभीष्टम्। यदि भू इत्ययमादेशः असिद्धः स्यात् तर्हि तस्य स्थाने बहो इत्ययं स्थास्यति गुणश्च न भविष्यति। परन्तु यदि भाधिकारस्य मर्यादार्थे प्रयोगः क्रियते तदा तु बहोर्लोपो भू च बहो [21] इति सूत्रस्यासिद्धत्वस्य सम्भावना एव न सम्भवति। अतः आङ् इत्यस्य मर्यादापक्षः न स्वीक्रियते अत्र तथा तु भाष्यकारेण एतेषामपि परिहारः प्रदत्तः अस्ति परन्तु तन्नोचितम् इति पश्चात् स्वयमेव ख्यापितम्।

अभिविधिपक्षे आचार्यपतञ्जलिना (पपुषः सौरी) इत्यादिषु प्रयोगेषु दोषाः प्रदर्शिताः परन्तु अनन्तरमेव तेषां समाधानमपि विहितं तथा चान्ते अभिविधिः पक्षः एव स्वीकृतः। नागेशभट्टोऽपि स्पष्टरूपेण आङम् अभिविधि इत्यर्थे एव स्वीकरोति। हरदत्तमिश्रोऽपि अन्तर्विरोधानां परिहाराय अभिविधिरेवोचिता इति व्याख्याययन् सर्वान्ते परिणामस्वरूपेण अभिविधिपक्षमेव अङ्गीकरोति।

## वतिकरणस्य प्रयोजनम्

पाणिनीय-अष्टाध्याय्याः विषये भाष्यकारस्येयमुक्तिः यदस्मिन् ग्रन्थे वर्णमेकमपि अनर्थकं नास्ति। 'तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्' [22] तदत्रासौ प्रश्नः यत् 'असिद्धवदत्राभात्' इति सूत्रे वतिकरणं किमर्थम्? यतोहि उपमान-उपमेयस्य अभेदविवक्षायां समानाधिकरणरूपेणापि निर्देशः क्रियते यथा अयं ब्रह्मदत्तः (अयं ब्रह्मदत्तवत् अस्ति) शास्त्रेऽपि आचार्यपाणिनिः वर्तिं विना प्रयोगान् विधत्ते यथा- 'षत्वतुकोरसिद्धः' तथा च 'गोतो णित्' [23] इत्यादिषु स्थलेषु वर्तिं विनैव अतिदेशसामर्थ्येनैव अर्थज्ञानं विधीयते। अतः प्रकृतसूत्रेऽपि सामर्थ्यात् अतिदेशार्थस्यावबोध सम्भाव्यते एव।

तदत्र सर्वप्रथमं न्यासकारेण वतिकरणस्य प्रयोजनविषये विचारः उपन्यस्तः। न्यासकारः वतिकरणं साऽभिप्रायं मन्यते। तेषामाशयोऽयं यत् सूत्रकारेण असिद्धम् इति नोक्त्वा असिद्धवदिति यदुच्यते तेन हि ध्वन्यते एतत् यत् कुत्रचित् स्वाश्रयमपि कार्यं भवति। 'तत् क्रियते, क्वचित् स्वाश्रयमपि सिद्धं यथा स्यादित्येवमर्थम्' [24] । कैयटस्य तु एतन्मतम् यत् प्रतिपत्तिलाघवाय भेदोपक्रमे वतिना निर्देशः क्रियते [25]। अन्ये त्वाहुः 'स्वाश्रयमपि यथा स्यादित्येवमर्थं वत्करणम्' [26]। उदाहरणार्थं - 'लोटो लङ्वत्' [27] लोट् लकारे, लङ् लकारः इव कार्यं भवति, (सार्धमेव वत्करणेन) स्वाश्रयमपि लोट् सम्बन्धितकार्याण्यपि भवन्ति। स्वाश्रयमपि कार्यं यथा स्यात् एतदर्थमेव वतिकरणम्। तदत्र न्यासकारः देभतुः इति उदाहरणमाध्यमेन स्वीयस्वाश्रयस्याभिमतं स्पष्टयति। [28] परन्तु तत्त्वबोधिनीकारः वतेः प्रयोजनं सौकर्यम् इत्येवमेव स्वीकरोति। वत्करणं प्रतिपत्तिलाघवाय अन्यथा सिद्धे असिद्ध इति प्रयुज्यमानमनुपपन्नं सत् सामर्थ्यादसिद्धवदिति कल्पनीयं स्यात् [29]।

वतिकरणविषये स्वाश्रयकार्यसम्बन्धि न्यासकारस्य मतं तेन न स्वीकार्यमस्ति। उपर्युक्तेऽस्मिन् प्रसङ्गे ध्यातव्यमेतत् यत् भाष्यकारवृत्तिकारौ अमुष्मिन् विषये सर्वथा मौनमासाते।

'असिद्धवदत्राभात्' इति सूत्रे 'अत्र' इति पदग्रहणस्य प्रयोजनम्।

अङ्गाधिकारीयासिद्धत्वयोजनायाः क्रियान्वयने आचार्यद्वारा प्रयुक्तम् अत्रेति पदं विशेषेण महत्त्वपूर्णमस्ति। असिद्धत्वस्य विवेचने उक्तपदस्य मीमांसा अत्यावश्यकी। भाष्यकारोऽत्र पदस्य प्रयोजनस्वरूपं तथ्यद्वयं समुपस्थापयति।

सर्वप्रथमम् अत्र पदस्य प्रयोजनविषये चर्चयन् भाष्यकारो ब्रवीति यत् 'अत्र' इति पदस्य ग्रहणं विषयनिर्देशाय अभवत्। 'विषयः प्रतिनिर्दिश्यते' [30] अनेन हि अस्मिन् आभीयप्रकरणे आभीयशास्त्रं प्रति आभीयशास्त्रमेव असिद्धं भविष्यति। अस्मात् भिन्नप्रकरणे यत् कार्यं तत्तु सिद्धमेव। उदाहरणार्थम् 'अभाजि' इति शब्दः पदं वा प्रदर्श्यते। 'भञ्जो आमर्दने' [31] इति धातोः लुङ् लकारे कर्मणि आत्मनेपदं भूत्वा अटागमः। च्लि विकरणम्, 'चिण् भावकर्मणोः' [32] इति 'च्लेः' स्थाने चिण्। (अभञ्ज् चिण् इ त) अस्यां स्थितौ 'भञ्जेश्च चिणि' [33] इति सूत्रेण चिणि परतः भञ्जेः उपधा नकारस्य लोपः प्रसज्यते (अ भज इत) इति स्थितौ चिणं णितं मत्वा भज इत्यस्य उपधायाः स्थाने 'अत उपधायाः' [34] इति सूत्रेण वृद्धिः प्राप्नोति। चिणम् आश्रित्यैव आभीयशास्त्रं 'भञ्जेश्च चिणि' सूत्रेण उपधाभूतस्य नकारस्य लोपः अतः एतत् वृद्धिकरणं नकारलोपश्च समानाश्रयं तदत्र यदि 'अत उपधायाः' इति सूत्रस्य दृष्टौ नकारलोपः असिद्धो भवति चेदिष्टं रूपं न कदापि सिध्यति। अत एवोक्तम् -

आभीयशास्त्रे आभीयमेव सूत्रम् असिद्धं भवति, आभीयमेव सूत्रं प्रति। तदेव च अस्मिन् सूत्रे 'अत्र' इति पदग्रहणस्य प्रयोजनम्। अतः तत्र नकारलोपः असिद्धः न भवति 'अत उपधाया' सूत्रेण च वृद्धिः भूत्वा 'अभाजि' इति साधीयान् इष्टः प्रयोगः सिध्यति।

## समानाश्रयप्रतिपत्तिहेतुः

'अत्र' इति पदस्योपन्यासस्य प्रयोजने भाष्यकारः एकमन्यं हेतुं प्रदर्शयति। कतिपयाः शब्दाः एतादृशाः आसन् येषामाभीयासिद्धत्वस्य प्रवृत्त्या इष्टान्वाख्यानं न भवति स्म।

यथा पपुषः पश्य। अत्र 'पा' धातोः लिट् लकारे द्वित्वम, पा पा लिट् अस्यां स्थितौ 'ह्रस्वः' [35] सूत्रेण अभ्यासस्य ह्रस्वः। प पा लिट्, लिटः स्थाने 'क्वसुश्च' सूत्रेण क्वसुः आदेशः, अनुबन्धलोपो भूत्वा, प पा वस्।

अस्यां स्थितौ प्रातिपदिकसंज्ञा भूत्वा द्वितीया विभक्तौ बहुवचने 'शस्' प्रत्ययः। प पा वस् शस्।

अधुना क्वसु प्रत्ययान्तम् आभीयसूत्रं 'वसोः सम्प्रसारणम्' [36] इत्यनेन सम्प्रसारणं तथा 'सम्प्रसारणाच्च' सूत्रेण पूर्वरूपो भूत्वा, प पा उस् अस्। अत्र अन्याभीयसूत्रं 'आतो लोप इटि च' [37] इत्यनेन अजाद् उस् प्रत्यये परतः पा इत्यस्य आकारलोपः प्राप्नोति। परन्तु आलोप-विधायकसूत्रस्य प्रवृत्तौ पूर्वप्रवृत्तम् आभीयसुत्रं सम्प्रसारणविधायकं सूत्रं प्रति असिद्धं भवति। येन हि उस् स्थाने वस् इत्येवं दृश्यते। येन आकारलोपो न सम्भवति इष्टान्वाख्यानं च न भवति। अस्य इष्टान्वाख्यानाय भाष्यकारः समादधाति यत् समानाश्रये एव कर्त्तव्याभीयसूत्रं प्रति कृताभीयम् असिद्धं भवति।

## समानाश्रयशब्दस्य विशेषं व्याख्यानम्

वार्त्तिककारः भाष्यकारश्च आभीयासिद्धत्वस्य कृते केवलं समानाश्रयशब्दं प्रयुञ्जेते। समानम् आश्रयं यस्य सः समानाश्रयः। न्यासकारः समानशब्दस्य अर्थं (एकम्) इति करोति तथा आश्रयशब्दस्य अर्थम् (निमित्त) इति कृतवान्। पदमञ्जरीकारोऽपि समानशब्दस्य अर्थं निमित्तमेव कुरुते। अत्रेति समानाश्रयत्वप्रतिपच्यर्थम्। तच्चेदत्र यत्र भवति तदाभात् शास्त्रीयं विधीयते तदाश्रयमेव भवति [38]। प्रदीपकारस्तु समानाश्रयशब्दमेव प्रयुङ्क्ते।

समान एव आश्रयो निमित्तं यस्य तत् समानाश्रयं तस्य भावः समानाश्रयत्वम् [39]।

अत्रग्रहणं तु समानाश्रयत्वप्रतिपत्त्यर्थम्। यदि उभेऽपि आभीये एकमेव निमित्तमाश्रित्य प्राप्नुतः [40]।

अत्र ग्रहणं तु समानाश्रयत्वप्रसिद्ध्यर्थं सम्पद्यते [41]।

समानमेवाश्रयो निमित्तं यस्य तत् समानाश्रयम्। तस्य भावः समानाश्रयत्वम् [42]।

उपर्युक्तविवेचनेन ज्ञायते यत् अत्र शब्दस्य ग्रहणस्य प्रयोजनद्वयं वर्त्तते।

१. विषय-निर्देशार्थम्।

२. समानाश्रयप्रतिपत्तिहेतुः।

अत्र प्रश्नोऽयं समुत्पद्यते यत् केवलम् अत्रपदेन द्वयोः प्रयोजनयोः ग्रहणं कथं सम्भाव्यते? तदत्र भाष्यकारो व्याख्याति - यत् अत्र पदेन समानाश्रयस्य परिज्ञानं भवति। यतोहि विषयनिर्देशस्य ज्ञानं तु आभात् पदेनापि भवितुमर्हति। यदि आभात् इति पदस्य प्रयोजनं केवलम् अधिकारस्य अवधिमात्रावबोधः तर्हि तत्तु 'असिद्धवदत्राभात्' इति सूत्रस्य अधिकारसूत्रत्वात् अपि सम्भवति स्म।

अतः आभात् इति पदेन विषयनिर्देशः भवति तथा च अत्र पदस्य प्रयोजनं समानाश्रयप्रतिपत्तिरेव। उत्सर्गापवादविधिना शब्दानाम् अन्वाख्यानकर्ता आचार्यपाणिनिः शब्दानुशासनार्थम् अनेकेषां प्रविधीनामाश्रयो निनाय। सूत्रकारेण स्वनिर्मितसूत्रेषु एव कुत्रचित् सहप्रसक्तिरूपेण, अपरत्र एकस्य सूत्रस्य प्रवृत्यनन्तरम् अन्यसूत्रस्य अनभीष्टप्रवृत्तिरूपेण सम्प्राप्तान् अन्तर्विरोधान् दूरीकर्तुम् अष्टाध्याय्याम् असिद्धप्रकरणस्य योजना विहिता वर्त्तते। असिद्धत्वप्रविधेः प्रयोगः पाणिनेः व्याकरणिकप्रतिभायाः निदर्शनमेव। असिद्धत्वप्रविधिः आचार्यस्यैका महत्त्वपूर्णा मौलिकविचारणा वर्त्तते।

## संदर्भ


1. पदमञ्जरी ६.४.२२
2. अष्टा. ३.४.८७
3. अष्टा. ६.४.३६
4. अष्टा. ६.४.१०५
5. अष्टा. ६.१.६२
6. अष्टा. ६.४.२२
7. म.भा. ६.४.२२
8. न्यासः ८.२.१
9. न्यासः ८.२१
10. पा.भा. १०६
11. म.भा. ६.४.२२
12. म.भा. ६.४.२२
13. अष्टा. ६.४.१२९
14. अष्टा. ६.४.१३३
15. अष्टा. ६.४.१३४
16. पा.भा. ५६
17. अष्टा. ६.४.१४८
18. अष्टा. ५.३.५७
19. अष्टा. ६.४.१५८
20. अष्टा. ६.४.१४६
21. अष्टा. ६.४.१५८
22. म.भा.पस्प.
23. अष्टा. ७.१.९०
24. न्यासः ६.४.२२
25. म.भा.प्र. ६.४.२२
26. म.भा.प्र. ६.४.२२
27. अष्टा. ३.४.८५
28. तत्र देभतुरित्यत्र स्वाश्रयैकहल्मध्यगतत्वाश्रयावेव त्वाभासलोपौ भवतः इति। म.भा.प्र. ६.४.२२
29. तत्त्वबोधिनी २.८३
30. म.भा. ६.४.२२
31. धा.पा. १०६०
32. अष्टा. ३.१.६६
33. अष्टा. ६.४.३३

34. अष्टा. ७.२.११६
35. अष्टा. ७.४.५९
36. अष्टा. ६.४.१३१
37. अष्टा. ६.४.६४
38. का. ६.४.२२
39. का. ६.४.२२
40. म.भा. ६.४.२२
41. म.भा.प्र. ६.४.२२
42. न्यासः ६.४.२२